पवं, क्ली, (पूयतेऽनेन । पूञ् शोधे + "ऋदोरप्" ३ । ३ । ५७ । इति अप् ।) गोमयम् । इति शब्दचन्द्रिका ॥ (गोमयशब्दे विवरणमस्य ज्ञातव्यम् ॥)

पवः, पुं, (पवनमिति । पूञ् शोधने + भावे अप् । यद्वा, पुनातीति । पू + अच् ।) निष्पावः । स च धान्यादीनां निर्बुषीकरणम् । शाल्यादेः शोधनं वहुलीकरणम् । इत्यमरभरतौ ॥ (पू + करणे अप् । यद्वा पुनातीति कर्त्तरि अच् ।) वायुः । इति शब्दचन्द्रिका ॥

पवनं, क्ली, (पूयते अग्निसंयोगेन यस्मिन् । पू + आधारे ल्युट् ।) कुम्भकारस्य आमघटादिपाकस्थानम् । पोयान् इति भाषा । इति मेदिनी । ने, ८४ ॥ (यथा,—

"यः कुम्भकारपवनोपरिपङ्कलेप-
स्तापाय केवलमसौ न तु तापशान्त्यै ॥")
इत्युद्भटः ॥)

पवनमिति प्रमादपाठः । जलम् । इति शब्दमाला ॥ प्रयते त्रि । इति शब्दरत्नावली । (भावे ल्युट् ।) पवित्रीकरणञ्च ॥

पवनः, पुं, (पुनातीति । पू + वहुलमन्यत्रापीति युच् ।) निष्पावः । वायुः । इति मेदिनी । ने, ८४ ॥ (यथा, गीतायाम् । १० । ३१ ।

"पवनः पवतामस्मि रामः शस्त्रभृतामहम् ॥")

अष्टौ वाह्यपवना यथा, सिद्धान्तशिरोमणौ ।

"भूवायुरावह इह प्रवहस्तदूर्द्ध्वः
स्यादुद्वहस्तदनु संवहसंज्ञकश्च ।
अन्यः ततोऽपि सुवहः परिपूर्व्वकोऽस्मा-
द्वाह्यः परावह इमे पवनाः प्रसिद्धाः ॥"

सप्त पवनाधिपा यथा, ज्योतिस्तत्त्वे ।

"शाकः प्रशाखिसंयुक्तो मुनिभिर्भागहारितः ।
आवहादिक्रमेणैव सप्त वाताः प्रकीर्त्तिताः ॥
आवहः प्रवहश्चैव सम्वहो निवहस्तथा ।
उद्वहो विवहो वायुः सप्त वाताः प्रकीर्त्तिताः ॥"

अन्यद्वायुशब्दे द्रष्टव्यम् ॥ (प्राणवायुः । यथा, हठयोगदीपिकायाम् । ३ । ७५ ।

"अनेनैव विधानेन प्रयाति पवनो लयम् ।
ततो न जायते मृत्युर्ज्जरारोगादिकं तथा ॥"

उत्तममनुपुत्त्रविशेषः । यथा, भागवते । ८।१।२३।

"तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ।
पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप ! ॥")

पवनविजयः, पुं, (पवनं श्वासवायुं विजयतेऽनेन । वि + जि + करणे अप् । यद्वा, पवनस्य विजयो यत्र ।) शुभाशुभसूचकश्वासवायुजयोपायकग्रन्थविशेषः । यथा—

सूत उवाच ।

"हरेः श्रुत्वा हरो गौरीं देहस्थं ज्ञानमब्रवीत् ।
कुजो वह्नी रविः पृथ्वी शौरिरापः प्रकीर्त्तिताः ॥
वायुसंस्थास्थितो राहुर्द्दक्षरन्ध्रावभासकः ।
गुरुः शुक्रस्तथा सौम्यश्चन्द्रश्चैव चतुर्थकः ॥
वामनाड्यास्तु मध्यस्थान् कारयेदात्मनस्तथा ।
यदाचार इड़ायुक्तस्तदा कर्म्म समाचरेत् ॥
स्थानसेवां तथा ध्यानं वाणिज्यं राजदर्शनम् ।
अन्यानि शुभकर्म्माणि कारयेत प्रयत्नतः ॥
दक्षनाड़ीप्रवाहे तु शनिर्भौमश्च सैंहिकः ।
इनश्चैव तथामीव पापानामुदयो भवेत् ॥
शुभाशुभविवेको हि जायते तु स्वरोदयात् ।
देहमध्ये स्थिता नाड्यो वहुरूपाः सुविस्तराः ॥
नाभेरधस्ताद्यः कन्दो अङ्कुरास्तत्र निर्गताः ।
द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः ॥
चक्रवच्च स्थितास्तास्तु सर्व्वाः प्राणहराः स्मृताः ।
तासां मध्ये त्रयः श्रेष्ठा वामदक्षिणमध्यमाः ॥
वामा सोमात्मिका प्रोक्ता दक्षिणा रविसन्निभा ।
मध्यमा च भवेदग्निः फलदा कालरूपिणी ॥
वामा ह्यमृतरूपा च जगदाप्यायने स्थिता ।
दक्षिणा रौद्रभागेन जगच्छोषयते सदा ॥
द्वयोर्वाहे तु मृत्युः स्यात् सर्व्वकार्य्यविनाशिनी ।
निर्गमे च भवेद्वामा प्रवेशे दक्षिणा स्मृता ॥
कारयेत् क्रूरकर्म्माणि प्राणे पिङ्गलसंस्थिते ।
इड़ाचारे तथा सौम्यं चन्द्रसूर्य्यगतस्तथा ॥
यात्रायां सर्व्वकार्य्येषु विषापहरणे इड़ा ।
भोजने मैथुने युद्धे पिङ्गला सिद्धिदायिका ॥
उच्चाटमारणाद्येषु कर्म्मस्वेतेषु पिङ्गला ।
मैथुने चैव संग्रामे भोजने सिद्धिदायिका ॥
शोभनेषु च कार्य्येषु यात्रायां विषकर्म्मणि ।
शान्तिमुक्तार्थसिद्धौ च इड़ा योज्या नराधिपैः ॥
द्वाभ्याञ्चैव प्रवाहे च क्रूरसौम्यविवर्ज्जने ।
विषुवतीन्तु जानीयात् संस्मरेत्तु विचक्षणः ॥
सौम्यादिशुभकार्य्येषु लाभादिजयजीविते ।
गमनागमने चैव वामा सर्व्वत्र पूजिता ।
युद्धादिभोजने घाते स्त्रीणाञ्चैव तु सङ्गमे ।
प्रशस्ता दक्षिणा नाड़ी प्रवेशे क्षुद्रकर्म्मणि ॥
शुभाशुभानि कार्य्याणि लाभालाभौ जयाजयौ ।
जीवाजीवाय यत् पृच्छेन्न सिध्यति च मध्यमा ॥
वामाचारेऽथवा दक्षे प्रत्यये यत्र नायकः ।
तत्रस्थः पृच्छते यस्तु तत्र सिद्धिर्न संशयः ॥
वैष्कन्दो वामदेवस्तु यदा वहति चात्मनि ।
तत्र भागे स्थितः पृच्छेत् सिद्धिर्भवति निष्फला ॥
वामे वा दक्षिणे वापि यत्र संक्रमते शिरा ।
घोरे घोराणि कर्म्माणि सौम्ये वै मध्यमानि च ॥
प्रस्थिते भागतो हंसे द्वाभ्यां वै सर्व्ववाहिनि ।
तदा मृत्युं विजानीयाद्योगी योगविशारदः ॥
यत्र यत्र स्थितः पृच्छेद्वामदक्षिणसंमुखः ।
तत्र तत्र समं दिश्याद्वातस्योदयनं सदा ॥
अग्रतो वामिका श्रेष्ठा पृष्ठतो दक्षिणा शुभा ।
वामेन वामिका प्रोक्ता दक्षिणे दक्षिणा शुभा ॥
जीवो जीवति जीवेन यच्छून्यं तत् स्वरो भवेत् ।
यत्किञ्चित् कार्य्यमुद्दिष्टं जयादिशुभलक्षणम् ॥
तत् सर्व्वं पूर्णनाड्यान्तु जायते निर्व्विकल्पकम् ।
शून्यनाड्यादिपर्य्यन्तमन्यत्र यदुदाहृतम् ॥
यावत् वर्णोन्तु पृच्छायां पूर्णायां प्रथमो जयेत् ।
रिक्तायान्तु द्वितीयन्तु कथयेत्तदशङ्कितः ॥
वामाचारः समं वायुर्जायते कर्म्मसिद्धिदम् ।
प्रवृत्ते दक्षिणे मार्गे विषमे विषमाक्षरम् ॥
अन्यत्र वामवाहे तु नाम वै विषमाक्षरम् ।
तदासौ जयमाप्नोति योधः संग्राममध्यतः ॥
दक्षवातप्रवाहे तु यदि नाम समाक्षरम् ।
जायते नात्र सन्देहो नाड़ीमध्ये तु लक्षयेत् ॥
पिङ्गलान्तर्गते प्राणे समानीयाहवञ्चयेत् ।
यावन्नाड्युदयं चारस्तां दिशं यावदाजयेत् ।
न जातु जयते सोऽपि नात्र कार्य्या विचारणा ॥
अथ संग्राममध्ये तु यत्र नाड़ी सदा वहेत् ।
सा दिशा जयमाप्नोति शून्ये भङ्गं विनिर्द्दिशेत् ॥
जातचारे जयं विद्यान्मृतके मृतमादिशेत् ।
जयं पराजयञ्चैव यो जानाति स पण्डितः ॥
वामे वा दक्षिणे वापि यत्र सञ्चरते शिरा ।
कृत्वा तत्पदमादौ तु यात्रां नयति शोभनाम् ॥
शशिसूर्य्यप्रवाहे तु सति युद्धं समाचरेत् ।
तत्रस्थः पृच्छते यस्तु स साधुर्जयति ध्रुवम् ॥
यां दिशं वहते वायुस्तां दिशं यावदाजयेत् ।
जयते नात्र सन्देह इन्द्रो यद्यग्रतः स्थित. ॥
मेषाद्या दश या नाड्यो दक्षिणा वामसंस्थिताः ।
चरस्थिरद्विमार्गे तास्ताद्दशे तादृशः क्रमात् ॥
निर्गमे निर्गमं याति संग्रहे संग्रहं विदुः ।
पृच्छकस्य वचः श्रुत्वा घण्टाकारेण लक्षयेत् ॥
वामे वा दक्षिणे वापि प्रश्नतत्त्वस्थितः शिवे ।
ऊर्द्धेऽग्निरध आपश्च तिर्य्यक्संस्थः प्रभञ्जनः ।
मध्ये तु पृथिवी ज्ञेया नभः सर्व्वत्र सर्व्वदा ॥
ऊर्द्धे मृत्युरधः शान्तिस्तिर्य्यक् चोच्चाटयेत् सुधीः ।
मध्ये हास्तं विजानीयान्मोक्षः सर्व्वत्र सर्व्वगे ॥"

इति गारुड़े पवनविजयादि ६७ अध्यायः ॥

पवनव्याधिः, पुं, (पवनः वायुरोग एव व्याधिरस्य ।) उद्धवः । श्रीकृष्णस्य सखा । इति त्रिकाण्डशेषः ॥ (यथा,—

"विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृताम् ।
प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम् ॥"
इति माघे । २ । १५ ॥

पवनात् प्रकुपितवायोरुद्भवो व्याधिः ।) वायुरोगश्च ॥

पवनात्मजः, पुं, (पवनस्य आत्मनः पुत्त्रः ।) हनूमान् । इति शब्दरत्नावली ॥ (पवनस्य वायोरात्मजः । "वायोरग्निः ।" इति श्रुतेर्वायुजन्यत्वादस्य तथात्वम् ।) हव्यवाहनः । इति मत्स्यपुराणम् ॥ (भीमसेनः । इति महाभारतम् ॥ यथा, राजतरङ्गिण्याम् । ८।२८६० ।

"वाहिनीरुद्धमार्गौ तौ पदवीमनुसस्रतुः ।
मार्गे धनञ्जयस्येव शैनेयपवनात्मजौ ॥")

पवनालः, पुं, (पवनाय निष्पावाय अलति पर्य्याप्नोतीति । अल पर्य्याप्तौ + अच् ।) धान्यविशेषः । देधान इति योनरी इति च भाषा । तत्पर्य्यायः । देवधान्यम् २ चूर्णाङ्घ्रिः ३ जुहुलः ४ जुललः ५ बीजपुष्पः ६ पुष्पगन्धः ७ । अस्य गुणाः । हितत्वम् । स्वादुत्वम् । लोहितत्वम् । श्लेष्मपित्तनाशित्वम् । अहृद्यत्वम् । तुवरत्वम् । रूक्षत्वम् । क्लेदकारित्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥